योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०२८

< योगवासिष्ठः | प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)

अष्टाविंशः सर्गः २८

श्रीराम उवाच ।

बीजाङ्कुराणां पुरुषकर्मणां जन्मकारिणाम् ।

दैवशब्दार्थयुक्तानां तत्त्वं वद विभो पुनः ।। १

श्रीवसिष्ठ उवाच ।

दैवकर्मादिपर्यायं घटादि घटतावधि ।

संवित्स्पन्दनमेवेदं लोके पुरुषतां गतम् ।। २

संवित्स्पन्दादृते पुंस्त्वं कर्म वा कीदृशं भवेत् ।

घटावटपटाद्यात्म ह्येतेनैव जगत् कृतम् ।। ३

प्रवर्तते जगल्लक्ष्मीः संवित्स्पन्दात्सवासनात् ।

निवर्तते हि संसारः संवित्स्पन्वादवासनात् ।। ४

अवासनं हि संवित्तेः स्पन्दमस्पन्दनं विदुः ।

सस्पन्दोऽप्यस्फुरत्स्पन्दो येनावर्तादिनोह्यते ।। ५

मनागपि न भेदोऽस्ति संवित्स्पन्दमयात्मनोः ।

कल्पनांशादृते राम सृष्टौ पुरुषकर्मणोः ।। ६

जलवीच्योर्यथा द्वित्वं संकल्पोत्थं न वास्तवम् ।

तथेह चित्परिस्पन्दरूपयोर्जन्तुकर्मणोः ।। ७

कर्मैव पुरुषो राम पुरुषस्यैव कर्मता ।

एते ह्यभिन्ने विद्धि त्वं यथा तुहिनशीतते ।। ८

हिमं यत्तद्यथा शैत्यं यच्छैत्यं तद्यथा हिमम् ।

यत्कर्मासौ तथा जन्तुर्यो जन्तुः कर्म तत्तथा ।। ९

संवित्स्पन्दरसस्यैव दैवकर्मनरादयः ।

पर्यायशब्दा न पुनः पृथक्कर्मादयः स्थिताः ।। १०

स्पन्दात्संविज्जगद्बीजमस्पन्दाद्यात्यबीजताम् ।

अङ्कुरश्च तदेवान्तः स्थितत्वादङ्कुरश्रियः ।। ११

चित्त्वं च क्वचिदस्पन्दं क्वचित्स्पन्दं स्वभावतः ।

अनन्तमेकार्णववद्दिक्कालक्रमसंस्थितम् ।। १२

संवित्स्पन्दो वासनावानिह बीजमकारणम् ।

भूत्वा कारणतामेति देहादेरङ्कुरावलेः ।। १३

तृणवल्लीलतागुल्मबीजान्तरगतेरपि ।

बीजं संवित्स्पन्द एव तस्य बीजं न विद्यते ।। १४

न बीजाङ्कुरयोर्भेदो विद्यतेऽग्न्यौष्ण्ययोरिव ।

बीजमेवाङ्कुरं विद्धि विद्धि कर्मैव मानवम् ।। १५

चित्स्फुरन्ती भूमिकोशे करोति स्थावराङ्कुरम् ।

स्थूलान्सूक्ष्मान्मृदुक्रूरान्पयोबुद्बुदकानिव ।। १६

चिता विना धराकोशादत्यन्तपरिपेलवात् ।

अङ्कुरान्वज्रसारांश्च क उल्लासयितुं क्षमः ।। १७

प्राणिवीर्यरसान्तस्था संविज्जंगममाततम् ।

तनोति लतिकान्तस्थो रसः पुष्पफलं यथा ।। १८

यदि सर्वगता संविद्भवेन्नातिबलीयसी ।

तत्क उल्लासने शक्तः स्याद्देवासुरभूभृताम् ।। १९

जङ्गमानां स्थावराणामेतदाद्यं च बीजकम् ।

संविद्विस्फुरणामात्रमस्य बीजं न विद्यते ।। २०

बीजाङ्कुरविकल्पानां क्रियापुरुषकर्मणाम् ।

ऊर्मिवीचितरङ्गाणां नास्ति भेदो न वस्तुनि ।। २१

द्वित्वं नृकर्मणोर्यस्य बीजाङ्कुरतया तयोः ।

विपश्चित्पशवे तस्मै महतेऽस्तु सदा नमः ।। २९

संवित्तेर्जन्मबीजस्य योऽन्तस्थो वासनारसः ।

स करोत्यङ्कुरोल्लासं तमसङ्गाग्निना दह ।। २३

कुर्वतोऽकुर्वतश्चैव मनसा यदमज्जनम् ।

शुभाशुभेषु कार्येषु तदसङ्गं विदुर्बुधाः ।। २४

अथवा वासनोत्साद एवासङ्ग इति स्मृतः ।

यया कयाचिद्युक्त्यान्तः संपादय तमेव हि ।। २५

ययैव वेत्सि ततया युक्त्या पुरुषयत्नतः ।

वासनाङ्कुरनिर्मूलमेतदेव परं शिवम् ।। २६

पौरुषेण प्रयत्नेन यथा जानासि वा तथा ।

निवारयाहंभावांशमेषोऽसौ वासनाक्षयः ।। २७

नास्त्येव पौरुषादन्या संसारोत्तरणे गतिः ।

निरहंभावरूपेऽस्मिन्वासनाक्षयनामनि ।। २८

आद्यैव संविदस्तीह सोऽङ्कुरो बीजमस्ति तत् ।

तत्कर्म तच्च पुरुषस्तद्दैवं तच्छुभाशुभम्।। २९

न बीजमादावस्त्यन्यन्नाङ्कुरो न च वा नरः ।

न कर्म न च दैवादि केवलं चिदुदेति हि ।। ३०

नो बीजमस्ति न किलाङ्कुरकोऽपि वास्ति

नाप्यस्ति कर्म पुरुषश्च न वास्ति साधो ।

एकं तु चित्त्वमुदितं ह्यनयाभिधान-

लक्ष्म्या नटः सुरनरासुरशोभयेव ।। ३१

इत्येव निश्चयमनामय भावयित्वा

त्यक्त्वा भृशं पुरुषकर्मविचारशङ्काम् ।

निर्वासनः सकलसंकलनाविमुक्तः

संविद्वपुर्ननु यथाभिमतेच्छमास्व ।। ३२

प्रशान्तसर्वेच्छमशङ्कमच्छ-

चिन्मात्रसंस्थोऽखिलकार्यकारी ।

आत्मैकरामः परिपूर्णकामो

भवाभयो राम शमाभिरामः ।। ३३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाण० उत्तरार्धे शङ्कातत्त्वसिद्धान्तप्रतिपादनं नामाष्टाविंशः सर्गः ।। २८ ।।